प्रयोगकादीनां पादपादहानिर्द्रष्टव्या । बाल-
वृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम् । इति प्राय-
श्चित्तविवेकः ॥ * ॥ अथ पुराणे ब्राह्मणस्य
मद्यपानादिनिषेधो यथा,—
"अपेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च ।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम् ॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत् ।
पीत्वा पतति कर्म्मभ्यस्त्वसम्भाष्यो द्विजोत्तमः ॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः ।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः ॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः ।
अपेयानि च विप्रो वै पीत्वा तद्याति रौरवम् ॥"
इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
मद्यपस्य विष्णोरुपसर्पणे दोषादि यथा,—
वराह उवाच ।
"मद्यं पीत्वा वरारोहे ! यस्तु मामुपसर्पति ।
तत्र दोषं प्रवक्ष्यामि शृणु सुन्दरि ! तत्त्वतः ॥
दश वर्षसहस्राणि दरिद्रो जायते पुनः ।
ततो भवेत् स पूतात्मा मद्भक्तश्च न संशयः ॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः ।
दीक्षितो पिबते मद्यं प्रायश्चित्तं न विद्यते ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
अग्नितप्तां सुरां पीत्वा तेन सुध्येत किल्बिषात् ॥
एवञ्चैवापराधानि येन मुच्यन्ति किल्बिषात् ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्यति पापेन संसारञ्च न गच्छति ॥
इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम् ॥
अपि च ।
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम् ।
शुद्ध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः ।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्व्विशुद्ध्यति ॥"
इति गारुड़े २२ अध्यायः ॥
एतद्गौड़ीमाध्व्योः कामतः सकृत्पानविषयमिति
प्रायश्चित्तविवेकदर्शनात् ॥*॥ द्विजस्य पूजादौ
मद्यदानविध्यनुकल्पनिषेधा यथा,—
"मदिरां एष्ठतो दद्यात् अन्यत् पानन्तु वामतः ।
अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः ॥
नारिकेलजलं कांस्ये ताम्रे च विसृजेन्मधु ।
नापद्यपि द्विजो मद्यं कदाचित् विसृजेदपि ॥
ऋते पुष्पासवादुक्ताद्ब्राह्मनाद्वा विशेषतः ।
राजपुत्रस्तथा मर्त्यः सचिवः सौप्तिकादयः ॥
दद्युर्नरबलिं भूपसम्मत्या विभवाय च ।
भूपालानुमते मद्यं ददत् पापमवाप्नुयात् ॥"
इति कालिकापुराणे ६६ अध्यायः ॥
अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा,
वैशम्पायन उवाच ।
"सुरापानाद्वञ्चनां प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम् ।
दृष्ट्वा कचञ्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन ॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः ।

काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः ॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्म्मा ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हितः स्यात् परे च ।
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके ।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे ॥"
इति महाभारते आदिपर्व्वणि ७६ अध्यायः ॥
अथ तन्त्रे मद्यपाननिषेधो यथा,—
"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च ।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम् ॥
द्राक्षन्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम् ।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम् ॥
मध्यमं मधुजं गौड़ं श्रेष्ठञ्चोत्तममिष्यते ।
एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित् ।
क्षत्त्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत् ॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम् ।
त्रैवार्षिकं व्रतं कुर्य्यादीषन्मिश्रे तु वार्षिकम् ॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा ह्यकामतः ।
कृच्छ्राब्दपादमुचर्य्य पुनः संस्कारमर्हति ॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत् ।
अनुपनीतो देवेशि ! व्रतं त्रैवार्षिकं चरेत् ॥
चतुर्थकालाहारी स्याद्ब्रह्मचर्य्यमथापि वा ।
आ पञ्च वर्षं द्व्यहं वा ज्ञानादर्द्धं विनिर्द्दिशेत् ॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत् ।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत् ॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते ।
माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते ॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु ।
राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते ।
मोहात् क्षत्रश्च वैश्यश्च पीत्वा कृच्छ्रद्वयं चरेत् ॥
शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंस्कृताम् ।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत् ॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्त्रियो वैश्य एव च ।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्द्दिशेत् ॥
ज्ञानादभ्यासयोगे तु चान्द्रायणत्रयं स्मृतम् ।
नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु ।
क्षत्त्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति ॥
अपक्वं पनसञ्चैव आम्रञ्च बदरं तथा ।
स्थापयित्वा घटे नित्यं दद्यादामपयःपलम् ॥
त्रैलोक्यविजयाञ्चैव मातुलङ्गं तथैव च ।
सप्तमेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम् ॥
दधि मधु घृतञ्चापि माक्षिकं तिक्तकं तथा ।
अनुपाने तु देवेशि ! द्राक्षमद्यं सुनिश्चितम् ॥
विड़ङ्गं शालयो मूलं——————— ।
मधुना सह संस्थाप्य शेषपाकं समाचरेत् ॥
पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम् ।
पानसं पक्वखर्ज्जूरं आर्द्रं सोमलतारसम् ।

एकीकृत्याग्निसन्धानात् खार्ज्जूरं मद्यमीरितम् ।
पक्वतालं दन्तिशाकं ककुभञ्च तथैव च ।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम् ॥
इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि ।
शेषे तु लवणं दत्त्वा इक्षु मद्यं प्रकीर्त्तितम् ॥
नवं मधु तथा बिल्वं पक्वं शर्करया सह ।
सन्धानाज्जायते मद्यं माध्वीकं शरतो रसम् ॥
शतावरी टङ्कमूलं लक्ष्मणं पद्ममेव च ।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम् ॥
मालूरमूलं बदरी शर्करा च तथैव च ।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम् ॥
इन्द्रजिह्वा पक्वधात्री नारिकेलजलन्तथा ।
कदलीफलसन्धानान्मद्यं तन्नारिकेलजम् ॥
दधि त्रैलोक्यविजया तथैव च करीकया ।
गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम् ॥
शस्कुलीमर्द्दसिद्धान्नपुष्पोदकसमन्वितम् ।
वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम् ॥
शेषेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत् ।
शृङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च ।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम् ॥"
इति श्रीमत्स्यसूक्ते महातन्त्रे चतुर्व्विंशति-
साहस्रे १६ पटलः ॥ * ॥ अपि च ।
"सिद्धमन्त्री भवेद्वीरो न वीरो मद्यपानतः ।
कलौ तु भारते वर्षे लोका भारतवासिनः ॥
युगे युगे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि ॥"
इति उत्पत्तितन्त्रे ६४ पटलः ॥ * ॥
"दिव्यवीरमयो भावः कलौ नास्ति कदाचन ।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम् ॥"
इति महानिर्व्वाणतन्त्रम् ॥ * ॥
श्रीक्रमे ।
"न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत् ॥
भैरवतन्त्रे ।
"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु ।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन ॥
एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत् ।
इति आगमतत्त्वविलासः ॥ * ॥
स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञ-
वल्क्यदीपकलिकायां ब्रह्मपुराणम् ।
"नराश्वमेधौ मद्यञ्च कलौ वर्ज्ज्या द्विजातिभिः ।"
निषेधविषयं धारयति उशनाः । "मद्यमदेयम-
पेयमनिग्राह्यम् ।" अनिग्राह्यमस्पृश्यमिति
कल्पतरुः ॥ कालिकापुराणेऽपि ।
"स्वगात्ररुधिरं दत्त्वा आत्महत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥"
स्मृतिः ।
"ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम् ।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥
अतो मद्यप्रतिनिधिदानमपि न युक्तम् । इति
तिथ्यादितत्त्वम् ॥ * ॥ मद्यतुल्यं यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं
मधु ।